National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2017; 1(11): 101-104
© 2017 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# मयूरदूते विविधाः वर्णनाः

**आचार्यः जि. पद्मनाभम्**

**सारांशः –** अस्मिन् शोधलेखे आधुनिककालस्य केरलीय-विदुषः **डॉ. पी. के. नारायण पिल्लै** महोदयस्य सुप्रसिद्धं सन्देशकाव्यं **'मयूरदूतम्'** अधिकृत्य विविधाः वर्णनाः विश्लेषिताः सन्ति। लेखस्य आरम्भे कवेः जीवनवृत्तं तस्य साहित्यकृतीनां च परिचयः दत्तः अस्ति। मयूरदूतं महाकवि-कालिदासस्य 'मेघदूतम्' अनुसृत्य विरचितं वर्तते, यत्र काव्यनायकः **केरलवर्मा** मयूरं दूतं कृत्वा स्वप्रियायै **लक्ष्मीभाई** महोदयायै सन्देशं प्रेषयति। लेखे मयूरस्य मार्गगमनप्रसङ्गे आगतानां केरलीय-प्रकृति-सौन्दर्यस्य (यथा- तालवृक्षाः, जलधाराः), नगराणां (कोल्लं, तिरुवनन्तपुरम्), पुण्यक्षेत्राणां (वर्कला, पद्मनाभस्वामि-आलयः, श्रीहरिक्षेत्रम्) तथा च नायिकायाः सौन्दर्यस्य सुष्टु निरूपणं कृतम् अस्ति। एतत् काव्यं केरलस्य भौगोलिक-सांस्कृतिक-वैभवस्य दर्पणम् अस्ति इति अत्र साधितम्।

**कूटशब्दाः (10 Key Words) -** १. मयूरदूतम् **(आधुनिक-सन्देशकाव्यम्)** २. डॉ. पी. के. नारायण पिल्लै **(काव्यस्य रचयिता)** ३. केरलवर्मा **(काव्यनायकः)** ४. सन्देशकाव्य-परम्परा **(कालिदासानुगामिनी)** ५. प्रकृतिवर्णनम् **(केरलीय-नारिकेल-तालवृक्षाः)** ६. स्यानन्दूरपुरम् **(तिरुवनन्तपुरस्य प्राचीननाम)** ७. अनन्तपद्मनाभस्वामी **(केरलस्य आराध्यदेवः)** ८. विप्रलम्भ-शृङ्गारः **(नायक-नायिकयोः वियोगः)** ९. श्रीहरिक्षेत्रम् **(हरिप्पाड् - स्कन्दक्षेत्रम्)** १०. केरल-संस्कृतिः **(नगर-क्षेत्र-भौगोलिकवर्णनम्)**

एकोनविंशति-विंशतिशताब्द्योः मध्ये केरलवासिनः बहवः संस्कृतसाहित्यसेवाम् अकुर्वन् । तेषु P.K. Narayana Pillai महाभागः अन्यतमः। अनेन महाकविना, नैकानि स्तबकानि, स्तोत्रकाव्यानि, एकं सन्देशकाव्यम् इत्यादि ग्रन्थसमुदायः विरचितः । अयं महाभागः केरलदेशे तिरुवल्लग्रामे क्रैस्तवीय 1910 तमे वर्षे दिसम्बरमासे पञ्चविंशतितारिकायां (15) जन्म लेभे। लक्ष्मी आम्म, गोदवर्मा अस्य पितरौ । अस्य पत्नी तु. जे. कमलम्मा। अस्य तिस्रः सुताः । तास्तु श्रीमती के.जयश्री, श्रीमती के.मञ्जुश्री, श्रीमती के.राज्यश्री । एषः नारायणपिल्लै महाभागः 1935 तमे वर्षे संस्कृतभाषायां M.A. पदवीं, 1936 तमे वर्षे मलयालभाषायां M.A. पदवीं. मद्रास् विश्वविद्यालयात् प्रथमश्रेण्याम् उत्तीर्णः । 1944 तमे वर्षे मुम्बई (Mumbai) विश्वविद्यालयात् संस्कृतभाषायां Ph.D. उपाधिं प्राप्तवान् ।

Dr.P.K. Narayana Pillai महाभागाः संस्कृतभाषायां, मलयालभाषायां, आङ्ग्लभाषायां च बहून् ग्रन्थान् रचयामास । ग्रन्थपट्टिका अधो दीयते।

**संस्कृतभाषायां रचिताः ग्रन्थाः**

1. चिदात्मिकास्तवः (1950)
2. श्रीवल्लभेश सुप्रभातम् (1974)
3. धर्मशास्त्रस्तवः (1974)
4. श्री शोनाद्रीशास्तवः (1975)
5. शबरगिरि तीर्थातनम् (1975)

6. कान्याकुमा रींभजे (1975)

7. विश्वभानुः (1970)

8. मयूरदूतम् (1984)

**सम्पादिताः ग्रन्थाः**

1. मदनकेतुचरितं 1948

2. लघुभास्करीयं 1949

3. ज्ञानाश्रयीच्छन्दोविचिति 1949

**मयूरदूते वर्णनाः**

कालिदासादनन्तरं मेघसन्देशम् आदर्शकाव्यत्वेन स्वीकृत्य वायुसन्देशः, भृङ्गसन्देशः, पारावतसन्देशः, चक्रवाकसन्देशः, कीरसन्देशः इत्यादीनि सन्देशकाव्यानि बहूनि विरचितानि । किन्तु अधुना कानिचन न लभ्यन्ते । क्रैस्तवीयैकादशशताब्द्याः अनन्तरं प्रायशः पञ्चाशत् (50) सन्देशकाव्यानि रचितानि । एतेषु कानिचन असम्पूर्णानि कानिचन सम्पूर्णानीव, लभ्यन्ते। तेषु मयूरदूतमेकम् । अत्र कृताः वर्णनाः परिशीलयामः ।

**वर्णनाः**

“नगयर्णव...”[1] इत्यादि महाकाव्ये महाकविभिः अवश्यं वर्णनीयानि इति आलङ्कारिकाणाम् अभिमतम् । मयूरदूतं तु महाकाव्यं न भवति । किन्तु एतदपि काव्यत्वेन आलङ्कारिकैः कथितत्वात्, अत्रापि प्रकृतिरामणीयकत्वं नदीपर्वतादिवर्णनं कविना क्रियेत । महाकविः कालिदासः स्वरचिते मेघसन्दे काव्ये पर्वतनदीनगरादि वर्णनानि सम्यक् अकरोति । मेघसन्देसमनुसृत्यैव तदनन्तरकालिकाः कवयः तथैव नवीनवर्णनाः चक्रुः । अत्रापि तन्मार्गमनुश्रृत्यैव मयूरदूतकर्ता अपि काव्येऽस्मिन् बहूनि वर्णनानि सम्यक् करोति ।

**प्रकृतिवर्णनम्**

दूतकाव्येषु सामान्यतया प्रकृति वर्णनानि अधिकतया दृश्यन्ते। वामनभट्टादयः स्वस्वसन्देशकाव्येषु प्रकृतिवर्णनं रमणीयतया अकुर्वन् । सन्देशकाव्येषु अत्याधुनिककाले विरचिते अस्मिन् मयूरदूतेऽपि प्रकृतिवर्णनानां प्राचुर्यं प्राप्यते । केषाञ्चन उदाहरणानां मुखेन, तत्र काव्यनायकः केरलवर्मा मयूरं दूतत्वेन स्वभार्यां प्रति प्रेषयन् मध्येमार्गे तालवृक्षाणां शोभाम् अवर्णयत् ।

हे मयूर ! नीलैः पर्णैः तव कण्ठतुलां नितान्तम् आवहन्तं स्थूलं तालवृक्षं वेगेन आरूह्य तदन्तरं तत्र कूपदण्डेन सहित एकः तरणिः गच्छति तद्गमन पर्यन्तं तस्मिन् वृक्षे आलीनः सन् तस्य अग्रभागे स्थिरतर- वपुः तिष्ठ इति।[2]

अत्र तालवृक्षस्य शिखरभागस्य पर्णानि नीलवर्णानि । तथैव मयूरस्य कण्ठभागोऽपि नीलवर्ण इति, तयोः मेलनम् इतरैः ज्ञातुम् अशक्यमिति कविः वर्णयति ।

अपि च तस्मिन् एव सन्दर्भे केरलवर्मा मयूरं प्रति एवं वदति - हे मयूर ! तस्मिन् वृक्षे प्राणिहितमतिः निश्चलः नीरवश्च आसीनः तं तत्रत्यानां प्रेक्षकाणां कृतकखगः (Artificial Bird) इति मतिं कुर्याः । गुणतरुवरे तस्मिन् तिष्ठन्तं युवानं भवन्तं तीरे सन्तः कुतूहलहृदयाः उच्चैः कीर्तयेयुः ।[3]

किञ्च केरलवर्मणः भार्यां प्रति सन्देशं नीतवतः मयूरस्य मार्गगमनवर्णनं कविः सम्यक् वर्णितवान्। मार्गमध्ये धान्यसमदृध्यै वापयोग्याः केदाराः सन्ति इति तत्रत्यासु कुल्यासु कच्छच्छदयः सन्तीति नद्यासु दाशैः प्रेर्थमाणाः दण्डप्रकर घटिताः नावश्च सन्तीति, तान् तान् दर्श दर्श नदीनां तीरमार्गेण गच्छेः'।[4]

अत्र केदारदि सौन्दर्यं सुष्टु वर्णितम्। अपि च तव मार्गे एका जलधारा (Panramic Back Water) नारिकेल वृक्षाः जलधारायां स्थितासु नावसु वीणा तन्त्री वादनं कुर्वतीभिः स्व प्रियाभिः विहरन्तः हूणा श्च त्वया द्रक्ष्यन्ते।[5] अत्र केरल देशः नारिकेल वृक्षाणां आकारः इति अनेन श्लोकेन अस्मभिः ज्ञायते ।

तस्यां जलधारायां तुङ्गाकारा एका तरणिः वर्तते। सा तरणिः पर्वताकारा इव--। तत् दृस्यं अब्धौ मैनाकास्थिति स्मारयति [6]

मार्ग मध्ये कोलम्बाख्य (Quilon) नागरस्य निकट भागस्थ उद्यानवनं वर्णयन् मयूरं उद्धिश्य एवं उक्तवान्। हे युवखग। नन्दन श्री विलासे रम्ये तस्मिन् उपवनतले स्वच्छन्दं सुखास्वादने लालसश्चेत्, त्वं तस्य उपवनस्य कुञ्जस्थीयतां तत्रत्याः मल्लिजाति प्रभृति पुष्पैः मुग्धहासः लताः त्वां सल्लीलाभिः किसलय करैः संवायेयुः । तेषां पुष्पानां परिमले आस्वादयन् कृपया माविलम्बस्व[7] अत्र गन्ध भरितं पुष्प वर्णनं सम्यक् कृतम्।

मयूरदूते 'श्रीलं वेलि' कविना सम्यक् वर्ण्यते। श्रीलं वेलि Veti back water (panoramic veli back water) इति नाम्ना केरल देशे व्यवष्ह्रियते। श्रीलं वेलि प्रदेशः

केरल राजधान्या तिरुवनन्तपुरस्य (Trivanrum) उत्तरस्यां दिशि योजना 10 कि.मी) वर्तते। । तत् श्रीलंवेलि प्रकृति रुचिरं सत् सरः भवति।[8] यस्मिन् सरसि काव्य नायकः केरल वर्मा स्व मित्रैः सार्क बहुकालं अनयत् । तत्र मेधानां समूहः जलंमादातुंकामाः कौतुकात् आगतः मेघसमूहः इव प्रस्तरौघः विधते।[9] अस्माभिः द्रष्टुं अतीव सुन्दरतया रामणीयकतया अस्तीति वक्तुं शक्यते।

**नगरवर्णनम्**

महाकाव्ये वर्ण्यमानेषु अष्टादशवर्णनेषु नगरवर्णनम् अन्यतमं भवति । कालिदासादिमहाकवयः स्वमहाकाव्येषु नगरवर्णनं चक्रुः। सन्देशकाव्यानि महाकाव्यानि न भवन्त्यपि काव्यवाच्यत्वं प्राप्नुवन्ति। अमुं विषयं मनसि कृत्वैव कालिदासः मेघसन्देशे नगरवर्णनं चकार । कालिदासपथमनुसृत्यैव विरचिते मयूरदूतेऽपि 'डा.पि.के. नारायण पिल्लै' महाभागः नगरवर्णनं सम्यक् अकरोत् ।

**कोल्लंनगरवर्णनम् -** प्रस्तुतराजधान्याः तिरुवनन्तपुरनगर्याः उत्तरपश्चिमदिशि सप्तति (70) किलोमीटर दूरे समुद्रतीरे

कोल्लंनगरं दरीदृश्यते। कोल्लं नगरञ्च चारित्रकप्रामुख्यमस्ति । अस्य नगरस्य उत्पत्तिविकासयोः विषये बहवो सिद्धान्ताः सन्ति । तेषु सिद्धान्तेषु क्रैस्तवीयाष्टमशताब्द्यां कोल्हापूरतः आगतैः आर्यैः Quilon कोल्लम् इति नामकरणं कृतमिति एको वादः अस्ति। अपि च सर्वे विश्वस्यते कोल्लं शकं era एतैरेव प्रारब्धमिति । क्रैस्तवीय त्रयोदश 13 शताब्दि काले कोल्लं नगरं वेनाडू देशस्य राजधानी आसीत् । कोल्लं इत्येतत् अधुना एकं सुन्दरं नगरम् अस्ति । तत्र वासाभिलाषात् स्वगृहमपि विस्मरन्तीति वादोऽप्यस्ति । एतन्निजमेव । वर्षेषु गच्छत्सु सत्सु एतन्नगरम् आधुनिकाभिवृद्धिप्राप्तम् । अपि च एतत् इदानीं महती राजधानी निरुवनन्तपुरनगरी अपि जयति ।[10]

तस्मिन् नगरे रम्यहर्याणि परिशुद्धजलस्नानवाटिकाः वाणिज्येन परिपूरितवीथयः तस्य नगरसम्पदं कथयन्तीव सन्ति।[11] तत्र प्राकारहर्म्येषु लेलिहानेषु प्रणयभरिताः पुरुषाः विजितरतिभिः लोलाक्षीभिः स्त्रीभिः क्रीडेयुः ।[12] ततः आकाशे विचरन् त्वं तन्नगरस्य पाठशालाः सैनिकस्थावरान्, वैद्यशालाः, आलयान् ब्राह्मणानां भोजनशालाश्च पश्येः ।[13] अनेन ज्ञायते कोल्नं एकं सुन्दरम् इति । हर्म्याणि सुन्दराणि इति सकलविद्यावैद्यधर्मशालाः सन्तीति ज्ञायते ।

**स्यानन्दूरनगरवर्णनम्, Trivandrum**

इय मेव अधुना त्रिवेन्ड्रम् (तिरुवनन्तपुरं) इति व्यवड्रियते। । एतत् प्राचीन काले 'वेनाडु' राज्यस्यशजधानी आसीत् । ततः 1745 तः 1949 वर्षन्तंर्यन्तं ट्रावन्कोर राजधानी बभूव । अस्य नगरस्य वर्ष सहस्र चरितमस्ति । त्रिवेद्धम् इत्येतत् तिरुवनन्तपुरस्य आङ्ङ्क्षपदं । तिरु अनन्तपुर इत्येतत् मलयालपदं। मलयालभाषायां स्थितस्य तिरु इत्यस्य संस्कृत भाषायां श्री इत्यर्थः। तत् पत्तनस्य मूल नामधेयं अनन्तपुर। अनन्तपुर इत्यस्मिन् पदे अनन्त इत्यस्य पद्मनाभ इत्यर्थः । अत एव तस्मिन् पट्टणे अनन्त पद्मनाभस्वामि देवालयः सुप्रसिद्धः अस्ति। अस्प पट्टकस्यैव अनन्तशयन 'स्यानन्दूर् पुरं' इति नामधेयोऽपि स्तः । संस्कृतिक वैभवेन विराजित मिदं पत्तणं अद्यतनस्य प्रान नगर (Capital city) मस्ति।[14]

तत् पट्टणं मयूरदूते इत्थम् अभिवर्णितम्। तत्पट्टणे निवसतां सुन्दरयुवतीनां निवासहर्म्याणि पुष्पैः विराजन्ते। तत्रत्यपुष्पोद्यानयुक्तपश्चिमसमुद्रतीरभागः देवतावासनगरमिव अस्ति।[15] तस्मिन् नगरे प्रधानवीथीषु गजराजसमूहं दृष्ट्वा मेघसमूहं भ्रान्त्या कल्पयति कविः ।

**प्रियाः सपदि स्वगृहं प्रविशेयुः ।**
**तत् दृश्यं द्रष्टुं सहज सुन्दरं भवेत्।।**[16]

**स्त्रीवर्णनम्**

सन्देशकाव्येषु स्त्रीणां वर्णनम् अत्यन्तं प्राधान्यं भजते। किमर्थमिति चेत् नायकनायिकयोः वियोगः अत्र प्रधानतया वर्ण्यते । नायिकायाः वियोगम् असहमानो नायकः तत्पुरतः विद्यमानः तत् प्राणी वा अप्राणी वा इति न गणयति । तं दूतरूपेण स्वीकृत्य तत् पुरतः स्वप्रियायाः नायिकायाः सौन्दर्यादि वर्णनं सम्यक् करोति । मयूरदूतेऽपि स्त्रीणां सौन्दर्यवर्णनं कविना सुष्ठु कृतम् । तत्रत्याः रामाः स्त्रियः स्ववचो चातुर्यैः संस्कारहीनान् युवकान् अन्वगच्छन् स्वप्रेमबन्धेन बद्धा निस्सहाथान् कुर्वन्ति ।[17] इन्द्रस्य अमरावती नगरे रमणीयम् एकमेव नन्दनोद्यानम् अस्ति । तत्र बहोःकालाच्चित्राकारा एकैव रम्भा विराजते । किन्तु अनन्तशयनस्य निलये (स्थानन्दूरपुरे) पत्रावल्या ललितवपुष अनेकाः नवाः रम्याः भान्ति ।[18] आर्थात् अत्रत्याः स्त्रियः स्वर्लोक रम्भामपि अधिशयरथे इति जायते ।

काव्यकर्ता काव्यनायिकां लक्ष्मीभाई एवं वर्णयति । भूतले स्वर्गेऽपि च तस्याः सौन्दर्योपमा अन्या स्त्री न विद्यते । सुगुणराशीं तां विज्ञानवन्तः पुरुषाः अपि प्रशंसन्ति । तस्याः सौष्ठवं राजसं सौन्दर्यं दृष्टवन्तः भाग्यवन्तः भवन्ति इति ।[19] अनेन श्लोकेन सा नयनान्दकारिणीति ज्ञायते । अपि च तस्याः नायिकायाः गुणादीन् एवं वर्णयति । तस्याः दृढसंकल्पः इतरनारीरत्नानां सुलभसाध्यं न भवति । आर्थात् इतर स्त्रियः न जानन्ति । तस्याः रूपलावण्यम् अन्यस्यां कस्यामपि न दृश्यते । तस्याः सौजन्यमपि अवधिरहितमेव। तस्याः दयार्द्रहृदयम् अपुरूपमेव । हे पक्षिराज ! मम राज्ञः सुगुणाः असाधारणाः भवन्ति।[20] अनेन श्लोकेन ज्ञायते लक्ष्मीभाई साधारणस्त्री न भवति।

**उपसंहारः (Conclusion)**

अस्य लेखस्य परिशीलनेन ज्ञायते यत् **'मयूरदूतम्'** केवलं कल्पनाविलासः न भूत्वा केरलदेशस्य जीवन्तं चित्रणम् अस्ति। कविना नारायणपिल्लै महोदयेन नवीनशैलीं प्रयुज्य कालिदासीया परम्परा अत्र अक्षुण्णा रक्षिता। कोल्लं-तिरुवनन्तपुरादि नगराणां तथा च पद्मनाभस्वामि-सदृशानां देवालयानां वर्णनेन काव्यमिदं श्रद्धास्पदं ऐतिहासिकं च जातम्। अत्र कृतं नायिकायाः सात्त्विक-सौन्दर्यवर्णनं तथा च प्रकृतेः तादात्म्यं आधुनिक-संस्कृतसाहित्ये मयूरदूतस्य गौरवपूर्णं स्थानं सुदृढं करोति।

**सन्दर्भग्रन्थसूची (Bibliography)**


१. **मयूरदूतम् (संस्कृत-सन्देशकाव्यम्):** ग्रन्थकर्त्ता- डॉ. पी. के. नारायण पिल्लै, सम्पादकः- डॉ. के. जयश्री, प्रकाशकः- चिदात्मिका प्रकाशनम्, तिरुवनन्तपुरम् (केरल), प्रकाशनवर्षम् १९८४।

२. **मेघदूतम् (कालिदास-विरचितम्):** ग्रन्थकर्त्ता- कालिदासः, सम्पादकः- पण्डित शेषराज शर्मा, प्रकाशकः- चौखम्बा सुरभारती प्रकाशन, वाराणसी (उत्तरप्रदेश), प्रकाशनवर्षम् २०१०।

३. **प्रतापरुद्रीयम् (अलङ्कारशास्त्रम्):** ग्रन्थकर्त्ता- विद्यानाथः, सम्पादकः- वी. राघवन्, प्रकाशकः- संस्कृत अकादमी, उस्मानिया विश्वविद्यालय, हैदराबाद (तेलङ्गाना), प्रकाशनवर्षम् १९७०।

४. **केरलीय-संस्कृत-साहित्य-इतिहासः:** ग्रन्थकर्त्ता- वटक्कुमकूर राजराजवर्मा, प्रकाशकः- केरल विश्वविद्यालय, तिरुवनन्तपुरम् (केरल), प्रकाशनवर्षम् १९६५।

५. **सन्देशकाव्य-विमर्शः:** ग्रन्थकर्त्ता- डॉ. रामकुमार आचार्य, प्रकाशकः- राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर (राजस्थान), प्रकाशनवर्षम् १९९२।

**पाद टिप्पणी:**

१. नगरार्णव शैलर्तु चंद्रार्कोदयवर्णनम्।
उद्यान स लिलक्रीडामधुपानरतोत्सवा :॥
विप्रलम्भा विवाहश्च कुमारोदयवर्णनम्।
मन्त्रदूतप्रयाणाजि नायकाभ्युदया अपि॥
एतानि यत्र वर्ण्यन्ते तन्महाकाव्यमुच्यते।
एषामष्टादशानां यैः कैश्चिद्वनमपीष्यते॥
प्रतापरुद्रीयम् पुटं – 67 विद्यानाथः, लैलापूर मदरास् - 1987

२. पर्णेनीलैस्तव गलतुलामावहन्तं नितान्तं
सालं स्थूलं विहग। ङथनात्तूर्णमारुह्य पश्चात्।
श्रद्धोपेतं सपदि तरणेः कस्थचित् कूपदण्डं
प्रात्यालीनू स्थिरतरवस्तिष्ठ तस्याग्रतस्त्वम्॥ मयू - दू 1-25

३. बुद्धिं कुर्याः कुतकखग इत्येव सम्प्रेकाणां
तत्रासीनः प्राणिहितमतिर्निश्चलो नीरवश्च।
उच्चैस्तस्मिन् गुणतरुवरे भासमानं युवानं
तीरे सन्तः कुतुकितहृदः कीर्तयेयुर्भवन्तम्॥ मयू - दू 1 - 23

४. केदारान् द्विस्त्रिरपि सुतरां वापयोग्ययान् समृदध्यै
कच्छानच्छानलिकुलिरयोः केलिरङ्गयमाणान्।
नावो दण्डप्रकरघटिताः प्रेर्यमाणाश्च दाशै
दर्श दर्श विहग ! सरितां तीरमार्गेण यायाः॥ मयू दू 1-23

५. स्वैरं वीणानिनदमधुरं संलपन्तीभिरुच्चै –
श्चाङून्यन्तस्तरणि सरसं प्राणनाथाभिरग्रे।
तीरं केरप्रकरहरितं वीक्ष्य संहृष्टचित्तान्
हूणोत्तसान् नयनविषयीकृत्य तुष्टो भवेस्त्वम्॥ मयू-दू - 1-30

६. तुङ्गाकारं सरसि तरणीं वाह्यामानामरित्रै
राटोपेन द्रुततरगतिं पश्यतस्ते तदानीम्।
मैनाको ऽब्धेर्निजननिलयनात् पक्षपक्ती प्रसार्य
क्षोणीमातुं त्वरितमटतीत्यङ्ग ! शङ्कोदयः स्थात्॥ मयू - दू 1-31

७. Pमल्लीजातिप्रभृतिकुसुमैर्मुग्धहासा लतास्त्वां
सल्लीलाभिः किसलयकरैरङ्ग ! संवाहयेयुः।
वल्लीनां त्वं परिचथरसादात्तरागेण तासा
मुल्लीढात्मा मयि तु कृपया माविलम्बस्व केकिन्॥ मयू. दू- 1-41
हत्वा कुञ्ज सुममधु पिबंस्तत्र सोल्लासमाराद्
भुञ्जानस्त्वं तरुफलततिं पत्रधातैरुपात्ताम्।
गच्छन् पश्चात् त्वरितगतिराश्रमधाम्नि प्रविष्टः
कृत्वा साक्षात् कमलनयनं कामतातं भजेथाः॥ मयू. दू. - 42

८. दष्टव्यं यत्सकलमापि तद्वीक्ष्य चोड्डीय काश्चिद्
दोणीमारात् कुतुकितधिया तूर्णमारूह्य थास्यन्।
वीतायासं त्रिचतुरघ टीकालमात्रेण केकिन्!
श्रीलं वेलि प्रकृतिरुचिरं सत्सरस्तत्र पश्येः॥ 55

९. यत्र क्रीडारसभरितधीर्यौवनस्योदये स –
न्मित्रैः साकं बहुतिथमहं नीतवान् कालमङ्ग।
मेघव्रातः प्रतनुविभवो नीरमादातुकामः
साकल्येनागत इव महाप्रस्तरौघोऽस्ति तत्र॥ मथू, दू. 1-63-64

१०. दृष्टे 'कोल्ले' सपदि सपदि रुचिरे तत्र वासाभिलाषाद्
विस्मर्येत स्वगृहमिति यद् वाक्यमासं न वादः।
सोऽयं देशः प्रतिनवपरिष्कारजालैरुढदा रै -
रुल्लङ्घयोश्चैर्जयति महतीं राजधानीमिदानीम्॥ मयू. दू. 1-47

११. अक्लान्ताभेः पतग! विततैर्मन्दिरश्रेणिभिस्तैः
स्नानायाच्छस्फटिकमलैश्चारुपद्माकरैश्च।
तौल्यातीतप्रचुरवसुभिर्वृद्धिभिः पण्यवीथ्या
स्तत्रावास –सुखतर इति प्रत्ययः सज्जनानाम्॥ मयू, दू. 1-48

१२. शृङ्गैरुच्चै द्युतलमनिशं लेलिहानेषु तत्र
प्राकारेषु प्राणयभरिताः सन्ततानन्दभाजः।
लोलाक्षीभिर्विजितरतिभिर्वष्मकान्त्या नितान्तं
क्रीडेयुर्ये सरसमभिका भाग्यवन्तस्त एव॥ मयू. दू. 1-49

१३. विद्यावेश्मान्यथ च विततं तत्र योधाधिवासं
कारागरं गदहरगृहं यावनं धर्मगेहम्।
शालां साधुद्विजपरिषदां भोजनार्थां पुरान्ते
वीक्षेथास्त्वं वियति विचरन्नेषु संलग्नचक्षुः॥ मयू, दू. 1-50

१४. Trivandrum was once the Capacity of Venadu and later it became the capital of the state of Travancore (1745-1949). It has got a long history extending over a perod of not less than 1000 years. Trivandrum is the anaficised from of Tiru Annatapura in malayalam is which Tiru Stands for Sri in Sanskrit. Teh basic name of the city is Anantapura and it is derived from Ananta the holy couch of Ssri Padmanabha to whom the most illustrious Temple, in the city is dedicated. It is also known by the names Ananata Sayana ans Syanandurapura. In Adition to Sripadmanabha temple there ae many other ancient temples in the city. It was developed under the patronage of the kings of travancore particularly after is be-came their capital. It is a great centre of culture and learning, and at present it is the capital of Kerala. मूय. दू. पुटं - 77

१५. नारीरत्नैर्विहाग ! महितैर्मन्दिरैः सान्द्रशोभै-
रुद्यानैचवच प्रचुरकुसुमैर्भूषिता राजधानी।
गीर्वाणानामसमसुषमंपत्तनं पश्चिमाब्धौ
साङ्गोपाङ्ग प्रतिफलितमित्याशु बुद्धि विदध्यात्॥ मयू. दू. 2-2

१६. पुर्यां तस्यां जलधरनिभं तुङ्गमातङ्गयूयं
दृष्ट्वा पान्थाः सपदि विधुराः स्वाधिवेशं विशेयुः।
तं चालोक्य प्रियसख। शनैर्मार्गमध्ये चरन्तं
सन्तुष्टिः स्यान्मनसि नितरां कालिकाशङ्काया ते॥ मयू. दू. 2-9

१७. वामास्तत्र त्वरितमसितापाङ्गशूलेन यूनां
भित्त्वा चित्तं तरलितधियां विभ्रमैर्वञ्चितानाम्।
सन्नद्धां ततकुहरनिहितां धीरतां चोरयित्वा
कुर्वन्त्येनानतनुविवशीभावखिन्नानमन्दम्॥ मयू. दू. 2-3

१८. वृत्रारातेर्महितनगरे नन्दनोद्यानरम्ये
चित्राकारा लसति सुचिराच्चित्रमेकैव रम्भा।
पत्रावल्या लयितवपुषः पन्नगाधीशपुर्या
तत्रारम्याः खगर! नवा भान्त्यनेका हि रम्याः॥ मयू. दू. 2-4

१९. तुल्या राज्ञा जगति न परा विद्यते हृद्यरुपा
स्वर्गेऽप्येवं सुमतिभिरलं कीर्त्तनीयैर्गुणौधैः।
सौभाग्यश्रीलसितसदनं यद्वपुः प्रेक्षकाणां
कुर्यादक्ष्णोः सपदि कृतिनां हर्षपीयूषवर्षम्॥ मयू दू 2-35

२०. नारीरत्नेष्वसुलभतरं सान्द्रमोजस्तथा तत्
तेजः कान्तिप्रसरमहितं रुपमन्यास्व दृष्टम्।
सौजन्यसौजन्याञ्चचाप्यषधिरहितं लोकसाधारणं नो
राजन्यायाः प्रियखग! गुणा नूनमन्यादृशास्ते॥ मयू, दू. 2-36